त्वौत्सर्गिकेण तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्ति नैतरेषामिति मन्यते” भा० । “विशेषञ्च दर्शयति” सू०। “नामादिषु च प्रतीकोपासनादिषु पूर्व्वस्मात् पूर्व्वस्मात् फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति “यावन्नाम्नोगतं तत्रास्य यथाकामचारो भवति” “वाग्वाव नाम्नोभूयसी” “यावद्वाचोगतं तत्रास्य यथाकामचारो भवति “मनोवाव वाचोभूयः” इत्यादिना । स चायं फलविशेषः प्रतीकतन्त्रत्वादुपासनानामुपपद्यते, ब्रह्मतन्त्रत्वे तु ब्रह्मणोऽविशिष्टत्वात्कथं फलविशेषः स्यात् ? । तस्मान्न प्रतीकालम्बनानामितरैस्तुल्यफलत्वमिति” भा० ।

उपासनञ्च मानसव्यापारो यद्यपि देहव्यापारानपेक्षस्तथापि आसीनस्यैव तद्भवति नान्यस्य यथाह शा० सू० भाष्ययोः” “आसीनः सम्भवात्” सू०।“कर्माङ्गसम्बन्धिषु कर्मतन्त्रत्वादासनादिचिन्तनेऽपि सम्यगदर्शने वस्तुतन्त्रत्वात् ज्ञानस्य, इतरेषुतूपासनेषु किमनियमेन तिष्ठन्नासीनः शयानो वा प्रवर्त्तेतोत नियमे न आसीन एवेति । तत्र मानसत्वादुपासनस्यानियमः शरीरस्थितेरित्येवं प्राप्ते ब्रवीति आसीन एवोपासीतेति कुतः ? सम्भवात् । उपासनं नाम समानप्रत्ययप्रवाहकरणं न च तद्गच्छतो धावतो वा सम्भवति गत्यादीनां चित्तविक्षेपकरत्वात् । तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमम्भवति । शयानस्याप्यकस्मादेव निद्रयाऽभिभूयते । आसीनस्य त्वेवंजातीयको भूयान्दोषः सुपरिहर इति सम्भवति तस्योपासनम्” भा० । “ध्यानाच्च” सू० “अपि च ध्यायत्यर्थ एषः यत्समानप्रत्ययप्रवाहकरणं, ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ध्यायति वको ध्यायति प्रोषितबन्धुरिति । आसीनस्यानायासो भवति । तस्मादप्यासीनकर्म्म उपासनम्” भा०। “अचलत्वापेक्ष्य” सू०। “अपि च ध्यायतीव पृथिवीत्यत्र पृथिव्यादिष्वचलत्वमपेक्ष्य ध्यायतिवादो भवति तच्च लिङ्गमुपासनस्यासीनकर्मत्वे” भा० । “स्मरन्ति च” सू० “स्मरन्त्यपि च शिष्टा उपासनाङ्गत्वेनासनम्” “शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः” इत्यादिना अतएव च पद्मकादीनामासनविशेषाणामुपदेशोयोगशास्त्रे”भा०। उपासनञ्चामरणात् भूयः कर्त्तव्यमित्यपि तत्रैवोक्तम् ।

“आ प्रायणात् तत्रापि हि दृष्टम्”सू०।“आवृत्तिः सर्वोपासनेष्वादर्त्तव्येति स्थितमाद्येऽधिकरणे । तत्र यानि तावत् सम्यगदर्शनार्थान्युपासनानि तान्यवघातादिवत् कार्यपर्यवसानानीति ज्ञातमेवैषामावृत्तिपरिमाणं न हि सम्यगदर्शने कार्ये निष्पन्ने यत्नान्तरं किञ्चिच्छासितुं शक्यम् अनियोज्यब्रह्मात्मत्वप्रतीतेः शास्त्रस्य विषयत्वात् । यानि पुनरभ्युदयफलानि तेष्वेषा चिन्ता किं कियन्तञ्चित्कालं प्रत्ययमावर्त्त्योपरमेत् उत यावज्जीवमावर्त्तयेदिति । किन्तावत् प्राप्तं कियन्तञ्चित्कालं प्रत्ययमभ्यस्योत्सृजेत् आवृत्तिविशिष्टस्योप सनशब्दार्थस्य कृतत्वादित्येवं प्राप्ते ब्रूमः। आ प्रायणादेवावर्त्तयेत् प्रत्ययम्, अन्त्यप्रत्ययवशाद् इष्टफलप्राप्तेः । कर्माण्यपि हि जन्मान्तरोपभोग्यं फलमारभमाणानि तदनुरूपं भावनाविज्ञानं प्रायणकाले आक्षिपन्ति । “सविज्ञानो भवति” “सविज्ञानमेवान्ववक्रामति” “यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथा सङ्कल्पितं लोकं नयतीति” चैवमादिश्रुतिभ्यः तृणजलायूकानिदर्शनाच्च । प्रत्ययास्त्वेते स्वरूपानुवृत्तिं मुक्त्वा किमन्यत् प्रायणकाले भावनाविज्ञानमपेक्षेरन् । तस्माद्ये प्रतिपत्तव्यफलभावनात्मकाः प्रत्ययास्तेषु प्रायणादावृत्तिः । तथा च श्रुतिः “स यावत्क्रतुरयमस्माल्लोकात् प्रैतीति” प्रायणकालेऽपि प्रत्ययानुवृत्तिं दर्शयति । स्मृतिरपि “यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय ! सदा तद्भावभावितः”इति “प्रयाणकाले मनसाऽचलेनेति” च । सोऽन्तवेलायामेतत् त्रयं प्रतिपद्येतेति” च मरणवेलायां कर्त्तव्यशेषं श्रावयति” भा०। प्रतीकभिन्नेषु उपासनेषु अर्चिरादिमार्गेण ब्रह्मलोकावाप्तिः फलम् । “अर्चिरादिना तत्प्रथितेः” शा० सू० भाष्ययोरुक्तम् तच्च अर्चिरादिमार्गशब्दे आतिवाहिकशब्दे च उक्तम् । युच् उपासनाप्यत्र स्त्री । “न्यायचर्च्चेयमीशस्य मननव्यपदेशभाक् । उपासनैव क्रियते श्रवणानन्तरागता” कुसु० सेवने च “उपासनामेत्य पितुः स्म सृज्यते” नैष०। शाण्डिल्योक्ता भक्तिरूपोपासना भक्तिशब्दे वक्ष्यते ।

**उपासा** स्त्री उप+आस भावे अ । उपासने “उपासासिद्धस्य प्रसंशामात्रम्” सां० सू०

**उपासादित** त्रि० उप+आ+सद–णिच्-कर्मणि क्त । १प्राप्ते भावे क्त । २प्राप्तौ तत् तत्कृतमनेन इष्टा० इनि उपासादितिन् कृतलाभे स्त्रियां ङीप् ।

**उपासित** त्रि० उप+आस–सेवनार्थत्वात् कर्मणि क्त । कृतोपासने यस्योपासनं कृतं तस्मिन् देवादौ ।

**उपास्ति** स्त्री उप+आस-क्तिन् स्त्रीप्रत्ययत्वेऽपि वा०युच् अ वा न क्तिनोबाधकः । उपासनायाम् “स्वर्गापवर्गयोर्मार्गमामनन्ति